# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – 01-09-2013 अङ्काः–100

पूर्वाह्णे - 10-00 तः 1-00 पर्यन्तम् समयः–घण्टात्रयम्

**1 अष्टानां प्रश्नानाम् एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।** 8×1=8

1. भोजस्य कस्मिन् महानादर आसीत् ?
2. अचक्षुषां चक्षुः कः ?
3. द्रोणाचार्यः कः ?
4. वृक्षस्योपरि का स्थिता ?
5. मल्लस्य नाम किम् ?
6. कालटिग्रामः कुत्र अस्ति ?
7. विद्यार्थी चेत् किं त्यजेत् ?
8. सर्वे देवाः कं स्तोतुं समुपचक्रिरे ?
9. पञ्चत्रन्त्रं केन ग्रथितम् ।
10. वायसस्य नाम किम् ?

**2 पञ्चानां वाक्यद्वयेन संस्कृतभाषया उत्तरं लिखत ।** 5×2=10

1. रावणस्य कोपः कथमभवत् ?
2. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?
3. शङ्कराचार्यस्य प्रसिद्धाः शिष्याः के ?
4. मल्लः परिकरं बध्वा राजानं किमुवाच ?
5. विष्णोराकारः कीदृशः? सः कैः ध्यानगम्यः ?
6. कौशिकः पक्षिणं कुतः क्रूरया दृष्ट्या अपश्यत् ?



पश्चादनुवर्तते

**3** **त्रयाणामुत्तरं संस्कृतभाषया / आङ्ग्लभाषया वा लिखत ।** 3×3=9

1. गृहिणी द्विजं किमवदत् ?
2. के के त्याज्याः ?
3. सुमतेरभिप्रायं विवृणुत।
4. चित्रग्रीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?

**4** **त्रयाणामुत्तरं संस्कृतभाषया / आङ्ग्लभाषया वा लिखत ।** 3×4=12

1. 'कालिदासः कवीनां चक्रवर्ती इति कथं परिगणितः' विवृणुत ।
2. एकलव्यस्य गुरभक्तिं विशदयत ।
3. 'वागाडम्बरवान् लोके न किञ्चित्कर्तुमर्हति' सोदाहरणं स्पष्टयत।
4. 'ब्राह्मणः सर्पश्च ' अस्याः कथायाः सारांशं लिखत ।

**5** **चतुर्णां ससन्दर्भं विवरणं स्वोत्तरभाषया लिखत ।** 4×3=12

1 नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता ।

2. केवलं जगति तेऽपि राक्षसाः ।
3. प्रभूतधनेन योजयिष्यामि ।
4. सर्वथा अविचार्य कर्म न कर्तव्यम् ।

**6** **द्वयोः सान्वयमर्थं स्वोत्तरभाषया लिखत ।** 2×3=6

1. त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम्।
   तद्धर्शिनमुदासीनं त्वामेव पुरुषं विदुः ।।

2. गते तु रावणे सीतां प्रलपन्तीं स मारुतिः ।
   उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ।।

3. प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
   किं न मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ।।

**7** **श्लोकद्वयं पूरयत ।** 2x4=8

1. प्रथमवयसि ........................................ विस्मरन्ति ।।
2. रवि .................................................... मतिः ।।
3. दोर्भिर्युक्ता ........................................... सुप्रसन्ना ।।

**8** **मातृभाषया अनुवादं कुरुत ।** 5

विक्रमार्के विश्वम्भरां पालयति, योगी कश्चिदुज्जयिनीं प्रत्यागच्छत् । स च वेदवेदाङ्गवित् सकलशास्त्रप्रवीणः। किं बहुना? सः साक्षात् सर्वज्ञ एव। एकदा विक्रमः तस्य परमां ख्यातिं निशम्य तमाह्वातुं पुरोहितं त्रिविक्रमं प्रेषयामास।

**9** **रिक्तस्थानानि पूरयत ।** 4x1=4

1. दृश् धातोः लोट् मध्यमपुरुषैकवचनम् .................. ।
2. कुमारसम्भवं ...................... विरचितम् ।
3. अस्ति .................. विशालः शाल्मली तरुः ।
4. साधुः शावकस्य ...................... इति नाम अकरोत् ।

**10** **त्रयाणां पर्यायपदानि लिखत ।** 3x1=3

1. शावकः 2. गलः 3. न्यग्रोधः 4. सारमेयः

**11** **त्रयाणां विरुद्धार्थकपदानि लिखत ।** 3x1=3

1. बन्धनम् 2. आदिः 3. अन्तिकम् 4. अल्पम्

**12** **वाक्यदोषं परिहरत ।** 3x1=3

1. ते राजपुत्राः पाठितः ।
2. राजः विक्रमः भवन्तम् आह्वयति ।
3. सः दुर्बुद्धिः सदैव अनुवर्तते ।

**13** **त्रयाणां स्ववाक्ये योजयत ।** 3x1=3

1. श्रुतः 2. अनुपदम् 3. अस्तु 4. उपसृत्य



पश्चादनुवर्तते

**14** **इतरपुरुषवचनरूपाणि लिखत ।** 1×3=3

1. क्षीयते  2. अब्रवीत्

**15** **सन्धिं विभज्य नाम लिखत । (त्रयाणामेव)** 3×1=3

1. रामो जयति  2. स्त्रगेषा  3. तस्मिन्निति  4. षड्वयाः

**16** **अर्थविवरणेन सह लोकोक्तिमेकां पूरयत ।** 3

1. क्लेशः ........................................ विधत्ते ।
2. यादृशं ........................................ तादृशी ।

**17** **व्याकरणविशेषं लिखत ।** 1×2=2

1. आस्ते स्म  2. कपोतराजः

**18** **समूहेतरपदं लिखत ।** 3×1=3

1. केयम्  नेयम्  हितोपदेशः  पाथेयम् ।
2. विहङ्गमः  विहगः  गजः  खगः ।
3. अस्तु  वस्तु  स्तौतु  निन्दतु ।

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – 01-09-2013 अङ्काः–50

अपराह्णे – 1-30 तः 3-00 पर्यन्तम् समयः–सार्धैकहोरा

**1 अ) दशभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत ।** 5

1. गजः 2. शालावार्षिकोत्सवः 3. सुभाषितानि

**आ) संस्कृतभाषया पत्रमेकं लिखत ।** 5

1. शाला-अध्ययनम् अधिकृत्य पितरं प्रति प्रतं लिखत ।
2. अनारोग्यकारणतः विरामं प्रार्थयन् कक्ष्याध्यापकं प्रति पत्रं लिखत ।

**2 द्वयोः लक्षणं सोदाहरणं आङ्ग्लभाषया कर्नाटकभाषया वा लिखत ।** 6

1. कर्तरिप्रयोगः 2. तुमुन्प्रत्ययः 3. अव्ययम्

**3 त्रिषु पुरुषवचनेषु लिखत ।** 6

1. गच्छेत् 2. मोदिष्यते 3. अभवत्

**4 एकस्य रूपाणि सर्वविभक्तिवचनेषु लिखत ।** 4

1. आत्मन् 2. पितृ 3. अस्मद्

**5 वाक्यदोषान् परिहरत ।** 3

1. माता पुत्रेण मोदकं यच्छति ।
2. नगरस्य दूरे वनं वर्तते ।
3. रामः लक्ष्मणस्य साकं वनं गच्छति ।

**6 प्रयोगं परिवर्तयत ।** 3

1. छात्रः शालां गच्छति ।
2. हरीशः पाठं पठितवान् ।
3. सूदेन ओदनं पच्यते ।



पश्चादनुवर्तते

**7** **कृदन्ताव्ययं चित्वा नाम लिखत ।** 3

1. रजकः वस्त्राणि क्षालयितुं नदीम् अगच्छत् ।
2. विप्राः नद्यां स्नात्वा सन्ध्यावन्दनम् आरभन्त।
3. माता पुत्रं दृष्ट्वा सन्तुष्टा अभवत् ।

**8** **त्रयाणां अन्यलिङ्गरूपं लिखत ।** 3

1. विद्वान्  2. जननी  3. युवतिः  4. पुत्रः

**9** **वाक्यमेकं कर्णाटकभाषया आङ्ग्लभाषया वा विवृणुत ।** 2

1. गतं न चिन्तयेत् प्राज्ञः ।
2. यथा राजा तथा प्रजाः ।

**10** **अनुवादं कुरुत ।** 5

1. रामः पाठशालां गच्छतु ।
2. नृपः प्रजाः अरक्षत् ।
3. आकाशे नक्षत्राणि राजन्ते ।
4. शिवानन्दः श्वः हरिद्वारं गमिष्यति ।
5. देशसेवायै जनाः आपदः सहन्ताम् ।

**11** **संस्कृतभाषया अनुवदं कुरुत ।** 5

1. ಮೊನ್ನೆ ನನ್ನ ತಾತನು ಹಳ್ಳಿಯಿಂದ ಬಂದನು.
   Day before yesterday my grandfather came from the village.
2. ಶಾಲೆಯ ಸುತ್ತಲೂ ಉದ್ಯಾನವು ಇದೆ.
   Garden (park) is around the School.
3. ಪ್ರಕಾಶನು ಆಟವಾಡಲು ಕ್ರೀಡಾಂಗಣಕ್ಕೆ ಹೋಗಲಿ.
   Let Prakash go to the playground to play.
4. ವಿದ್ಯಾರ್ಥಿಯು ಪಾಠವನ್ನು ಬರೆಯುತ್ತಿದ್ದಾನೆ.
   Student is writting the lesson.
5. ಅಧ್ಯಾಪಕನು ಶಿಷ್ಯನನ್ನು ಕೇಳಿದನು.
   The teacher asked the student.

* * * * *